 

॥ श्री परमपूज्य परमहंस परिव्राजकाचार्य श्रीवासुदेवानन्द सरस्वती विरचितं

मंत्रगर्भ श्री दत्तात्रेयाष्टोत्तर शतनाम स्तोत्रं ॥

# ।। श्री दत्तात्रेयाष्टोत्तर शतनाम स्तोत्रम् ।।

ॐकार तत्त्वरूपाय दिव्यज्ञानात्मने नमः। नभोतीतमहाधाम्न ऐंद्र्यृध्या ओजसे नमः ॥ १॥
नष्टमत्सरगम्याया- गंयाचारात्मवर्त्मने। मोचितामेध्यकृतये ऱ्हीं बीज श्राणितश्रिये ॥ २॥
मोहादि विभ्रमांताय बहुकायधराय च । भत्तदुर्वैभवछेत्रे क्लीं बीज वरजापिने ॥ ३॥
भवहे- तुविनाशाय राजच्छोणाधराय च । गतिप्रकंपितांडाय चारुव्यहत बाहवे ॥ ४॥
गतग- र्वप्रियायास्तु यमादियतचेतसे। वशिताजातवश्याय मुंडिने अनसूयवे ॥ ५॥
वदद्व- रेण्यवाग्जाला-विस्पृष्टविविधात्मने। तपोधनप्रसन्नाये-डापतिस्तुतकीर्तये ॥ ६॥
तेजोमण्यंतरंगाया-द्मरसद्मविहापने। आंतरस्थानसंस्थायायैश्वर्यश्रौतगीतये ॥ ७॥
वातादिभययुग्भाव-हेतवे हेतुबेतवे। जगदात्मात्मभूताय विद्विषत्षद्कघातिने ॥ ८॥
सुरव-र्गोद्धृते भृत्या असुरावासभेदिने। नेत्रे च नयनाक्ष्णे चिच्चेतनाय महात्मने ॥ ९॥
देवाधि देवदेवाय वसुधासुरपालिने। याजिनामग्रगण्याय द्रांबीजजपतुष्टये ॥ १०॥
वासना वनदावाय धूलियुग्देहमालिने। यतिसंन्यासिगतये दत्तात्रेयेति संविदे ॥ ११॥
यजनास्यभुजेजाय तारकावासगामिने। महाजवास्पृग्रूपाया-त्ताकाराय विरूपिणे ॥ १२॥
नराय धीप्रदीपाय यशस्वियशसे नमः। हारिणे चोज्वलांगायात्रेस्तनूजाय संभवे ॥ १३॥
मोचितामरसंघाय धीमतां धीरकाय च। बलिष्ठविप्रलभ्याय यागहोमप्रियाय च ॥ १४॥
भजन्महिमविख्यात्रेऽमरारिमहिमच्छिदे। लाभाय मुंडिपूज्याय यमिने हेममालिने ॥ १५॥
गतोपाधिव्याधये च हिरण्याहितकांतये। यतीन्द्रचर्यां दधते नरभावौषधाय च ॥ १६॥
वरिष्ठ योगिपूज्याय तंतुसंतन्वते नमः। स्वात्मगाथासुतीर्थाय मःश्रिये षट्कराय च ॥ १७॥
तेजोमयोत्तमांगाय नोदनानोद्यकर्मणे। हान्याप्तिमृतिविज्ञात्र ओंकारितसुभक्तये ॥ १८॥
रुक्षुड्मनःखेदहृते दर्शनाविषयात्मने ।रांकवाततवस्त्राय नरतत्त्वप्रकाशिने ॥ १९॥
द्रावितप्रणताघाया-त्तःस्वजिष्णुःस्वराशये।राजन्त्र्यास्यैकरूपाय मःस्थायमसुबंधवे ॥ २०॥
यतये चोदनातीत- प्रचारप्रभवे नमः। मानरोषविहीनाय शिष्यसंसिद्धिकारिणे ॥ २१॥

गंगे पादविहीनाय चोदनाचोदितात्मने। यवीयसेऽलर्कदुःख- वारिणेऽखंडितात्मने ॥ २२॥

ऱ्हींबीजायार्जुनज्येष्ठाय दर्शनादर्शितात्मने। नतिसंतुष्टचित्ताय यतिने ब्रह्मचारिणे ॥ २३॥

इत्येष सत्स्तवो वृत्तोयात् कं देयात्प्रजापिने। मस्करीशो मनुस्यूतः परब्रह्मपदप्रदः ॥ २४॥

॥ इति श्री परमपूज्य परमहंस परिव्राजकाचार्य श्रीवासुदेवानन्द सरस्वती विरचितं मंत्रगर्भ श्री दत्तात्रेयाष्टोत्तर शतनाम स्तोत्रं संपूर्णम् ॥

This Mantra Garbha Dattatreya Ashtottara is one of the finest works of Datta avatari Parama pujya Sri Sri Sri Vasudevaananda Saraswathi Maharaj.

If the reader sees this pdf , on arranging each shloka in a single line ( both purva and uttara ardha);we can observe that by arranging 1st, 4th 9th 17th and 25 th aksharas of each shloka column wise in entire document, we get several popular mahamantras like

1.Om Namo Bhagavate Vaasudevaaya (highlighted by orange colour ),
2. Namo Bhagavate Rudraya(pink) ,
3.Famous Vishwamitra Gayatri mantra (in red),
3 Datta Gayatri, (in blue)
4 Anjaneya mantra, (in Dark red)
5.Rama Shadakshari, ( in Green)
6.Navaarna mantra of chandi , (in Blue)
7.Dattareya Ashtakshari mantra (in Pink)and
8. Shiva Panchakshari . (in red)

At certain places words are hyphenated in between intentionally to show these embedded mahamantras.

This work clearly displays Swamiji's genius and intuition in composing Stotras.